# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

## छात्रावाससमितिः

---

**आवासार्थं चयनस्य नियमाः –**

१. विश्वविद्यालयात्सुदूरवर्तिनां छात्राणां कृते प्राथम्येन विचारः करणीयः।

२. स्थायिसङ्केताद् अध्वपरिमाणं चयनस्याधारः स्यात्।

३. प्रत्येकं विभागस्य पञ्च छात्राः उच्चप्रतिशतानुसारं चेतव्याः।

४. यदि कस्मिंश्चिदपि विभागे सङ्ख्या न्यूना अथवा शून्या स्यात् तर्हि अन्येषु विभागेषु समायोजनीया।

५. पञ्चस्थानानि छात्रावाससमितेरनुशंसाधारितानि स्युः।

६. ये छात्राः राज्यशासनेन केन्द्रशासनेन कयाचित्संस्थया वा आवासस्य लाभं तद्धेतोरर्थलाभं वा प्राप्नुवन्ति ते वासार्थमनर्हाः स्युः।

७. हीनानुशासनानां छात्राणाङ्कृते छात्रावासे प्रवेशो न दातव्यः।

८. सङ्क्रामकरोगग्रस्तानां विद्यार्थिनाङ्कृते आवासो न स्यात्।

९. प्रतिवर्षम् आवासाय आवेदनं करणीयम्।

१०. चयनप्रक्रियायां छात्रावाससमितेर्निर्णयः सर्वमान्यो भवेत्।

# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

## छात्रावाससमितिः

---

**छात्रावासस्य नियमाः —**

१. छात्राः मादकपदार्थस्य धूमपानस्य वा सेवनं नहि करिष्यन्ति।

२. छात्रावासे अस्त्रशस्त्राणामापत्तिजनकानां वस्तूनां स्थापनं सर्वथा निषिद्धम्।

३. छात्रावासिनां छात्राणां कक्षायां पञ्चसप्ततिप्रतिशता उपस्थितिरनिवार्या।

४. छात्रावासाद्बहिर्गमनाय अधीक्षकादनुमतिर्गृहीतव्या।

५. सायं सप्तवादने समेऽपि आवासिच्छात्राः निश्चितकक्षायां प्रार्थनार्थमुपस्थिताः भवेयुः।

६. छात्रेण छात्रावासस्य उपयुज्यमानानां वस्तूनामनवधानाद् विध्वंसनस्य क्षतिपूर्तिर्वोढव्या।

७. छात्रावासिच्छात्रैः सह मेलनाय आगताःअभिभावकाः मित्राणि च नामादिकस्य प्रविष्टिः कार्यालयीयपुस्तिकायाम् अवश्यमेव कुर्युः।

८. छात्राः अमानवीयव्यवहारं नैव कुर्वीरन।

९. प्रशासनस्य निर्दिश्यमानाः यथाकालं निर्देशाः परिपालनीयाः।

# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

## छात्रावाससमितिः

---

**विविधशुल्काः –**

१. प्रतिमासं भोजनस्य २५०० रूप्यकाणि स्युः।

२. आवासस्य ५०० रूप्यकाणि स्युः।

३. सप्तघण्टाभ्यः प्रदत्तपूर्वसूचनानुसारम् एकवारं भोजनस्य कृते ५० रूप्यकाणि स्युः।

४. छात्रावाससमितेः परामर्शानुगुणं यथाकालं परिवर्तनं परिवर्द्धनं भवितुमर्हति।